सहस्रं साधको नित्यं सर्व्वसिद्धिपरायणः ।
पुरश्चरणमेतद्धि तन्त्रे तन्त्रे निरूपितम् ॥
संक्रान्त्यादिषु सर्व्वासु विषुवादिषु पार्व्वति ! ।
संक्रान्त्यनुसारेणैव वर्द्धयेच्च सहस्रकम् ॥
पूर्व्वमुखो जपेन्मन्त्रं धनार्थी सर्व्वदा प्रिये ! ।
शत्रुनाशाय सततं दक्षिणाभिमुखो जपेत् ॥"
इति स्वतन्त्रे तन्त्रे हरगौरीसंवादे रहस्यपुरश्चरणविधिः ॥ * ॥) अत्र आगमकल्पद्रुमोक्तकूर्म्मचक्रं तच्छब्दे द्रष्टव्यम् । हरिभक्तिविलासीयपुरश्चरणन्तु तद्ग्रन्थे सप्तदशविलासे दर्शनीयम् ॥

पुरश्छदः, पुं, (पुरश्छदति छादयतीति । छद् + अच् । यद्वा, पुरोऽग्रतश्छदाः पत्राण्यस्य ।) तृणविशेषः । उलु इति भाषा । तत्पर्य्यायः । दर्भः २ शष्पः ३ सोमपत्रः ४ परातृप्रियः ५ । इति शब्दचन्द्रिका ॥

पुरस्कारः, पुं, (पुरस्करणमिति + पुरस् + कृ + भावे घञ् ।) पुरस्क्रिया । अभिशापः । अरिग्रहणम् । अग्रकरणम् । (पुरः क्रियतेऽनेनेति ।) पूजनम् । ("तस्य बहुमानपुरस्कारं कृत्वा ।" इति हितोपदेशः ॥) स्वीकारः । सेकः । इति पुरस्कृतशब्दार्थदर्शनात् ॥

पुरस्कृतः, त्रि, (पुरः क्रियते स्मेति । पुरस् + कृ + क्तः ।) अभिशस्तः । अरिग्रस्तः । अग्रकृतः । पूजितः । इति मेदिनी । ते, २१३ ॥ स्वीकृतः । सिक्तः । इति हेमचन्द्रः ॥

पुरस्तात्, अ, (पूर्व्वस्मिन् पूर्व्वस्यां पूर्व्वस्मात् पूर्व्वस्याः वा पूर्व्वः पूर्व्वा वेति । पूर्व्व + "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।" ५ । ३ । २७ । इति अस्तातिः । "अस्ताति च ।" ५ । ३ । ४० । इति पूर्व्वस्य पुरादेशः ।) प्राच्यां दिशि । यथा, पुरस्तात् सूर्य्य उदेति । प्रथमे काले । यथा, पुरस्ताद्गुरुक्तं । पुरार्थे । अतीते । यथा, पुरस्ताद्रामोऽभूत् । अग्रतः अग्रे देशे । यथा, पुरस्तादायाति । इत्यमरभरतौ ॥ (यथा च रघौ । २ । ४४ ।
"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्ने-
र्नश्यत् पुरस्तादनुपेक्षणीयम् ॥")

पुरा, अ, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् का ।) प्रबन्धः । वाक्यरचना पुराणादिः । यथा, पुराविदः । चिरम् । चिरन्तनम् । पुराणमित्यर्थान्तरम् । अतीतम् । भूतम् । चिरातीतमित्येकम् । यथा इतिहासः पुरावृत्तमिति केचित् ॥ निकटः । सन्निहितः । आगामिकम् । अनागतम् । निकटागामिकः । भविष्यदासत्तिः । इति केचित् ॥ इत्यमरभरतौ ॥ भीरुः । इति शब्दरत्नावली ॥ (प्राक् । इति हेमचन्द्रः । ६ । १७१ ॥ यथा, पञ्चदश्याम् । २ । १४ ।
"इदं सर्व्वं पुरा सृष्टेरेकमेवाद्वितीयकम् ।
सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः ॥")

पुरा, स्त्री, (पुरतीति । पुर + क + टाप् ।) पूर्व्वदिक् । सुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । गन्धवती २ दिव्या ३ गन्धाढ्या ४ गन्धमादिनी ५ सुरभिः ६ भूरिगन्धा ७ कुटी ८ गन्धकुटी ९ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कषायत्वम् । कफपित्तश्वासास्रविषदाहार्त्तिभ्रममूर्च्छातृषानाशित्वञ्च । इति राजनिर्घण्टः ॥

पुराकृतं, त्रि, (पुरा पूर्व्वं पूर्व्वस्मिन् काले वा कृतम् ।) प्रारब्धकर्म्म । पूर्व्वकालकृतपुण्यादि । यथा,—
"अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"
इति स्मृतिः ॥

पुराणं, क्ली, (पुरा भवमिति । पुरा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।" ४ । ३ । २३ । इति ट्युः । "पूर्व्वकालैकसर्व्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।" २ । १ । ४९ । इति निपातनात् तुडभावः । यद्वा, "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।" ४ । ३ । १०५ । इति निपातितः । यद्वा, पुरा नीयते इति । नी + ड । णत्वञ्च ।) व्यासादिमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितशास्त्रम् । तत्पर्य्यायः । पञ्चलक्षणम् २ । इत्यमरः । १ । ६ । ५ ॥ पञ्चलक्षणानि यथा, सर्गः १ प्रतिसर्गः २ वंशः ३ मन्वन्तरम् ४ वंशानुचरितम् ५ ॥ महापुराणस्य दश लक्षणानि । यथा, सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंशानुचरितम् ७ संस्था ८ हेतुः ९ अपाश्रयः १० ॥ अथाष्टादशमहापुराणानि तेषां श्लोकसंख्यानि च तथा । ब्राह्मं दशसहस्रम् १ पाद्मं पञ्चपञ्चाशत्सहस्रम् २ वैष्णवं त्रयोविंशतिसहस्रम् ३ शैवं चतुर्व्विंशतिसहस्रम् ४ भागवतम् अष्टादशसहस्रम् ५ नारदीयं पञ्चविंशतिसहस्रम् ६ मार्कण्डेयं नवसहस्रम् ७ आग्नेयं चतुःशताधिकपञ्चदशसहस्रम् ८ भविष्यं पञ्चशताधिकचतुर्द्दशसहस्रम् ९ ब्रह्मवैवर्त्तम् अष्टादशसहस्रम् १० लैङ्गं एकादशसहस्रम् ११ वाराहं चतुर्व्विंशतिसहस्रम् १२ स्कान्दं शताधिकैकाशीतिसहस्रम् १३ वामनं दशसहस्रम् १४ कौर्म्मं सप्तदशसहस्रम् १५ मात्स्यं चतुर्द्दशसहस्रम् १६ गारुडं ऊनविंशतिसहस्रम् १७ ब्रह्माण्डं द्वादशसहस्रम् १८ । समुदायेन चतुर्लक्षश्लोकाः । इति श्रीभागवतीयद्वादशस्कन्धः ॥ (अपि च देवीभागवते १ स्कन्धे ३ अध्याये तथा मत्स्यपुराणे ५३ अध्याये एतद्विवरणं द्रष्टव्यम् ॥) अपि च ।

सूत उवाच ।
"विस्तराणि पुराणानि चेतिहासञ्च शौनक ! ।
संहितां पञ्चरात्राणि कथयामि यथागमम् ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं विप्र ! पुराणं पञ्चलक्षणम् ॥
एतदुपपुराणानां लक्षणञ्च विदुर्बुधाः ।
महताञ्च पुराणानां लक्षणं कथयामि ते ॥ * ॥
सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ॥
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम् ।
संख्यानञ्च पुराणानां निबोध कथयामि ते ॥
परं ब्रह्मपुराणञ्च सहस्राणां दशैव च ।
पञ्चोनषष्टिसाहस्रं पाद्ममेव प्रकीर्त्तितम् ॥
त्रयोविंशतिसाहस्रं वैष्णवञ्च विदुर्बुधाः ।
चतुर्विंशतिसाहस्रं शैवमेव निरूपितम् ॥
ग्रन्थोऽष्टादशसाहस्रं श्रीमद्भागवतं विदुः ।
पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्त्तितम् ॥
मार्कण्डं नवसाहस्रं पुराणं पण्डिता विदुः ।
चतुःशताधिकं पञ्चदशसाहस्रमेव च ॥
परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम् ।
चतुर्द्दशसहस्राणि परं पञ्चशताधिकम् ॥
पुराणप्रवरञ्चैव भविष्यं परिकीर्त्तितम् ।
अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीप्सितम् ॥
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः ।
एकादशसहस्रञ्च परं लिङ्गपुराणकम् ॥
चतुर्व्विंशतिसाहस्रं वाराहं परिकीर्त्तितम् ।
एकाशीतिसहस्रञ्च परमेव शताधिकम् ॥
परं स्कन्दपुराणञ्च सद्भिरेवं निरूपितम् ।
वामनं दशसाहस्रं कौर्म्मं सप्तदशैव तु ॥
मात्स्यं चतुर्द्दशं प्रोक्तं पुराणं पण्डितैस्तथा ।
ऊनविंशतिसाहस्रं गारुडं परिकीर्त्तितम् ॥
परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्त्तितम् ।
एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम् ॥
अष्टादशपुराणानामेवमेव विदुर्बुधाः ।
एवञ्चोपपुराणानामष्टादश प्रकीर्त्तिताः ॥ * ॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च ।
पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यपूर्व्वकम् ।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥
पञ्चम्यः संहितानाञ्च कृष्णभक्तिसमन्विताः ।
ब्रह्मणञ्च शिवस्यापि प्रह्लादस्य तथैव च ॥
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः ।
इति ते कथितं सर्व्वं क्रमेण च पृथक् पृथक् ॥
अस्त्येवं विपुलं शास्त्रं ममापि च यथागमम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः ॥
पद्मपुराणमते तु ।
"निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ॥
पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत् ।
धर्म्माधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम् ॥
गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ ।
तानि ते कथयिष्यामि सप्रमाणानि भूतले ॥" * ॥
पुराणसंख्यान्तरमाह ।
"पुराणानि चतुर्लक्षाण्येतानि धरणीतले ।
तथा महाभारतञ्च लक्षसंख्यं प्रकीर्त्तितम् ॥
पञ्चलक्षमिदं राजन् ! कथितं ब्रह्म केवलम् ।
वेदः पञ्चमनामेष लोकनिस्तारकः परः ॥